प्रश्नः – अधस्थितस्य श्लोकस्य प्रसङ्गोल्लेखपूर्वकं संस्कृतेन देवनागरलिप्या च व्याख्यानं कुरुत।

उत्तरम् –

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः।

निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव॥ (गीता – ११.५५)

वेदव्यासविरचितायाः श्रीमद्भगवद्गीतायाः विश्वरूपदर्शनयोग इत्यभिधेयात् एकादशाध्यायात् समाम्नातोऽयं श्लोकः।

समग्रस्य गीताशास्त्रस्य सारभूतम् अंशं निःश्रेयसरूपं उपदिशता भगवता श्रीकृष्णेन उच्यते मत्कर्मकृन्मत्परमः...इति।

हे पाण्डव! हे पाण्डुपुत्र! हे अर्जुन! यः जनः मत्कर्मकृत् मदर्थं कर्म करोति, मत्परमः मामेव परमां गतिं मन्यते, मद्भक्तः मम भजनकारी, सङ्गवर्जितः आसक्तिरहितः, सर्वभूतेषु निर्वैरः सर्वप्राणिषु शत्रुभाववर्जितः स जनः माम् श्रीकृष्णं एति प्राप्नोति इति सान्वयप्रतिपदार्थाः।

समग्रे गीताग्रन्थे बहुषु स्थानेषु निष्कामकर्मणः महिमा कीर्तितः। भगवान् एव परमा गतिरिति ज्ञानमेव श्रेष्टं ज्ञानम् इत्यपि तत्र उपदिष्टम्। सङ्गवर्जनं तत्र सर्वेषु भूतेषु निर्वैरतापि बहुषु श्लोकेषु भगवता ज्ञापिता। ते सर्वे उपदेशाः अस्मिन् श्लोके संगृह्य परिवेशिता इति भाष्यकृताम् आशयः।

हे पाण्डुनन्दन अर्जुन! मदर्थं कर्मानुष्ठानं यः करोति, यश्च मामेव परमां गतिं प्रतिपद्यते, यथा कश्चित् भृत्यः सततमेव प्रभोः कृत्यं सम्पादयति तद्वत् भक्तजनेनापि सततमेव ईश्वरार्थे कर्म सम्पादनीयम्। भक्तस्तु भृत्यादपि अधिकं मन्यते ईश्वरं तस्य इहलौकिकं पारलौकिकं च गतिस्वरूपं अवजानाति सः। श्रीकृष्ण एव परमा गतिरिति स ध्रुवं जानाति। अतएव तादृशः भक्तः मत्परमः इत्युच्यते।

तथा मद्भक्तः मामेव सर्वप्रकारैः सर्वात्मना सर्वोत्साहेन भजते इत्यस्मात् कारणात् स मद्भक्त इति निगद्यते। सङ्गः नाम आसक्तिः। तां सर्वविधाम् आसक्तिं परित्यज्य यो भगवन्तं भजते तस्य धनेषु, पुत्रेषु,

मित्रेषु, कलत्रेषु तथा बन्धुषु न कश्चित् स्नेह; न च कापि प्रीतिः सञ्जायते। सः भक्तप्रवरः केवलं कृष्णप्रीतिमेव वाञ्छति।

सर्वभूतेषु अर्थात् सर्वप्राणिषु अपगतः वैरभावः यस्य तादृशः यो भक्तजनः स एवं माम् अर्थात् श्रीकृष्णं प्राप्नोति देहावसाने। यतः भगवान् साक्षात् एव तस्य परमा गतिः भवति।

अत्रेदं वक्तव्यं यत् मत्कर्मकृत् मत्परमः इत्यत्र पदयुगले नास्ति पुनरुक्तिदोष; यतः भगवान् एव परा गतिरिति चिन्तयतः तस्य भक्तप्रवरस्य भगवति एव निष्ठा दृढं सञ्जायते इति साक्षात् भगवता एव निगदितम् इति शिवम्॥